।। শ্ৰী য়ংত্ৰোদ্ধাৰক স্তুতিঃ ।।

নমামি দূতং ৰামস্য় ।
সুখদং চ সুৰদ্ৰুমম ।
পীনৱৃত্তমহাবাহুং ।
সৰ্ৱশত্ৰুনিৱাৰণম ।। ১ ।।

নানাৰত্নসমায়ুক্ত ।
কুণ্ডলাদি ৱিৰাজিতং ।
সৰ্ৱদাভীষ্টদাতাৰং ।
সতাং ৱৈ দৃঢমাহৱে ।। ২ ।।

ৱাসিনং চক্ৰতীৰ্থস্য় ।
দক্ষিণস্থগিৰৌসদা ।
তুংগাংবোধিতৰংগস্য় ।
ৱাতেন পৰিশোভিতে ।। ৩ ।।

নানাদেশাগতৈস্সদ্ভিঃ ।
সেৱয়মানং নৃপোত্তমৈঃ ।
ধূপ দীপাদি নৈৱেদ্যৈঃ ।
পংচখাদ্যৈশ্চ শক্তিতঃ ।। ৪ ।।

ভজামি শ্ৰী হনূমংতম ।
হেমকাংতি সমপ্ৰভং ।
ৱয়াসতীৰ্থ য়তীংদ্ৰেণ ।

পূজিতং প্রণিধানতঃ ।। ৫ ।।

ত্রিৱাৰং য়ঃ পঠেন্নিত্য়ং ।
স্তোত্রং ভক্তাদ্দ্বিজোত্তমঃ ।
ৱাংছিতং লভদেঽভীষ্টং ।
ষণ্মাসাভ্য়ংতৰে খলু ।। ৬ ।।

পুত্রার্থির্লভতে পুত্রং ।
য়শার্থির্লভতে য়শঃ ।
ৱিদ্য়ার্থির্লভতে ৱিদ্য়াং ।
ধনার্থির্লভতে ধনং ।। ৭ ।।

সৰ্ৱথা মাস্তুসংদেহো ।
হৰিঃসাক্ষী জগত্পতিঃ ।
য়ঃ কৰোত্য়ত্র সংদেহং ।
স য়াতি নৰকং ধ্ৰুৱম ।। ৮ ।।

www.yousigma.com